'इन्द्रियजन्यमेव ज्ञानं प्रत्यक्षमित्युच्यते, ब्रह्मज्ञानं तु नेन्द्रियजन्यमविषयत्वाद् ब्रह्मणः । "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" (तै ब्र. 4-9) इत्यादिश्रुतेः ।

(आ. २२०-२२२) **ब्रह्म न ज्ञानेन्द्रियाणां विषयः**—

(२२०) **ब्रह्म न चक्षुषो विषयः**—रूपवतः पदार्थस्य अथवा नीलादिवर्णस्यैव ज्ञानं चक्षुषा जन्यते । ब्रह्म तु न तादृशं; अतो न ब्रह्म नेत्रेन्द्रियजन्यज्ञानविषयः । मनुष्याकारेणावतीर्णानां रामकृष्णादीनां मूर्तयो यद्यपि रूपादिमत्यस्तथापि ता मूर्तयो मायिकत्वान्मिथ्या । अतो न ता मूर्तयो ब्रह्मरूपाः । यद्यपि पुराणादिषु रामकृष्णादीनां ब्रह्मरूपेण वर्णनमस्ति तथापि तद्वचनं न तदीयशरीरस्य ब्रह्मत्वबुद्ध्या प्रवृत्तं; किन्तु तदीयशरीराधिष्ठानचैतन्यस्य ब्रह्मत्वबुद्ध्येति ज्ञेयम ।

**ननु** मनुष्यपशुपक्ष्यादिसर्वशरीराणामप्यधिष्ठानं ब्रह्मचैतन्यमेव । अधिष्ठानचैतन्याभिप्रायेण रामकृष्णादीनां ब्रह्मत्वे सर्वशरीराणामपि ब्रह्मचैतन्यस्यैवाधिष्ठानत्वान्मनुष्यपशुपक्ष्यादयोऽपि ब्रह्मरूपा भवेयुः । तथा च पश्वादिसमा एव रामकृष्णादयोऽपि भवेयुः । तस्माद्रामकृष्णादीनां जीवान्तरापेक्षया वैशिष्ट्यसिद्धये तदीयशरीरे एव ब्रह्मबुद्धिरुचिता, न तु तदीयशरीराधिष्ठानचैतन्यदृष्ट्या तेषु ब्रह्मबुद्धिरिति चेत् ।

**तन्न** । शरीरं **बाधित्वा** रामकृष्णादिशरीराणां ब्रह्मत्वविवक्षणे पश्वादिशरीराणामपि **बाधपूर्वं** ब्रह्मत्वं सिद्ध्येत् । **बाधाभावे** तु जीवान्तराणां शरीरवत् करचरणाद्यवयवसहितस्य रूपक्रियादियुक्तस्य रामकृष्णादेः शरीरस्य निरवयवेन रूपक्रियादिशून्येन ब्रह्मणा सहाभेदो न घटेत । तस्मात्सावयवं रूपक्रियादियुक्तं रामकृष्णादेः शरीरं न ब्रह्म ।

परं **त्वियान् भेदोऽस्ति**—जीवानां शरीरं पुण्यपापाधीनं, भूतकार्यं च । किञ्च जीवानां देहाद्यनात्मपदार्थेष्वविद्याबलात् 'अहं, मम' इत्यध्यासो भवति, स चाध्यास आचार्योपदेशान्निवर्तते ।

रामकृष्णादीनां शरीरं तु न **तदीयपुण्यपापजन्यं नापि भौतिकम्** । परं तु सृष्टेः प्राक् यदा प्राणिनां कर्म फलदानोन्मुखं भवति तदा आप्तकामस्यापीश्वरस्य प्राणिनां कर्मानुसारेण 'अहं जगत्सृजेयम्' इति सङ्कल्पो जायते । तेन सङ्कल्पेन **जगदुत्पत्तिरूपा सृष्टि**र्भवति । तथैव सृष्टेः परमपि 'अहं

जगत्पालयेयम्' इतीश्वरस्य सङ्कल्पो जायते। तेन सङ्कल्पेन **जगद्रक्ष्यते।** कर्मानुसारेण सुखदुःखादिसंबन्ध एव **पालन**मित्युच्यते। पालनसङ्कल्पमध्ये उपासकानामुपासनफलत्वेन 'रामकृष्णादिनामसहिता मूर्तयः सर्वेषां प्रतीयन्ताम्' इति चेश्वरस्य सङ्कल्पो भवति। अनेनेश्वरसङ्कल्पेन नामरूपादिरहिते ईश्वरे रामकृष्णादिनामानि पीताम्बरादिसहितसुन्दरविग्रहाश्चोत्पद्यन्ते। न ते रामकृष्णादीनां विग्रहास्तदीयकर्माधीनाः।

तैश्च रामकृष्णादिविग्रहैः साधूनां सुखं दुष्टानां दुःखं चोत्पद्यते। यच्छरीरं यस्य सुखदुःखादेर्हेतुर्भवति तच्छरीरं तदीयपुण्यपापजन्यमिति न्यायः। अनेन न्यायेन रामकृष्णादीनां शरीरं साधूनां सुखहेतुत्वात्साधूनां **पुण्यपुञ्जफलं,** असुरादीनां दुष्टानां दुःखहेतुत्वात्तेषां पापफलं च भवति। एवमवतारपुरुषशरीरस्यापि पुण्यपापाधीनत्वात्तदनधीनत्वोक्तिरसङ्गतेति चेत्।

**अत्रेदं तत्त्वम्**—जीवेन पूर्वशरीरे कृतपुण्यपापयोः फलमुत्तरशरीरे तस्यैव जीवस्य सुखदुःखादिरूपं भवति। तस्माच्छरीराभिमानवतो जीवस्य पूर्वजन्मनि स्वेनैव कृतपुण्यपापयोरधीनमुत्तरशरीरमित्युच्यते। रामकृष्णाद्यवतारपुरुषशरीरं तु साध्वसाधुजनसुखदुःखहेतुत्वात्साध्वसाधुजनकृतपुण्यपापाधीनमेव, न तु रामकृष्णादिपुण्यपापाधीनम्। अत एव न तेन शरीरेण रामकृष्णादीनां सुखदुःखभोगः। तस्माद्रामकृष्णाद्यवतारपुरुषशरीरं तदीयपुण्यपापाद्यधीनं नेति सिद्धम।

किञ्च रामकृष्णादिशरीरं **न पञ्चभूतपरिणामः,** किन्तु चैतन्याश्रितमायापरिणामः। पञ्चीकृतभूतपरिणामत्वे कृष्णशरीरस्य रज्जुकृतबन्धनाविषयत्वं भागवतादिषु वर्णितमसङ्गतं भवेत्। यद्यपि पञ्चभूतकार्ययोगिशरीरस्यापि बन्धनाविषयत्वं दृश्यते, तथापि योगिशरीरं प्रथमं बन्धनविषयतामापद्यैव पश्चाद्योगमहिम्ना बन्धाद्विमुक्तं भवति। कृष्णादिशरीरं तु न योगिशरीरवद्योगमहिम्ना बन्धाविषयतां याति; किं तु स्वभावत एव बन्धाद्यवशम्। तस्मान्नावतारपुरुषशरीरं पञ्चभूतपरिणामः। भगवत्पादकृतमाण्डूक्योपनिषद्भाष्यस्य टीकायामानन्दगिरिस्वामिभिः रामादिशरीरस्य भूतपरिणामत्वं यदुक्तं तदपि स्थूलदृष्टीनामितरशरीरतुल्यतयैवावतारपुरुषशरीरमपि प्रतीयते इत्यभिप्रायेणेति मन्तव्यम्। अत एव भगवत्पादैर्गीताभाष्योपक्रमे "स च भगवान् स्वां मायां वशीकृत्याजोऽव्ययोऽपि सन् स्वमायया देहवानिव जात इव च लोकानुग्रहं

कुर्वन्निव लक्ष्यते" इति "जगतः स्थितिं परिपिपालयिषुः स आदिकर्ता विष्णुर्देवक्यां वसुदेवादंशेन कृष्णः किल संबभूव" इति च कृष्णशरीरं मायाकार्यत्वेन वर्णितम्। तस्मान्न भूतेभ्योऽवतारपुरुषशरीरमुत्पद्यते। किन्तु तदुपादनकारणं साक्षान्मायैव।

इतरेषां जीवानां देहे 'अहं' इत्यात्मभ्रान्तिरस्ति। रामकृष्णादीनां तु न सा भ्रान्तिरस्ति। जीवस्योपाधिभूता 'अविद्या' मलिनसत्वयुक्ता; रामकृष्णादीनामुपाधिभूता 'माया' तु शुद्धसत्वयुता। तस्माज्जीवस्याविद्याकार्यभूता भ्रान्तिः, रामकृष्णादेर्मायाकार्यभूतसर्वज्ञत्वं चास्ति। जीवस्याज्ञानप्रयुक्तावरणभ्रान्त्योर्निवृत्तये आचार्यमुखान्महावाक्योपदेशजन्यज्ञानमपेक्षितम्। रामकृष्णादेरावरणभ्रान्त्योरभावेनोपदेशजन्यज्ञानं नापेक्षितम्। तथापि जीवस्यान्तःकरणवृत्तिरूपज्ञानमिवेश्वरस्य मायावृत्तिरूपात्मज्ञानमुपदेशं विनैव जायते। किन्तु न तेन ज्ञानेन किञ्चिदपि प्रयोजनमीश्वराणां सिद्ध्यति।

तथाहि, जीवस्य घटादिज्ञानेनावरणभङ्गो घटादिरूपविषयस्य प्रकाशश्चेति फलं सिद्ध्यति। जीवस्य 'अहं ब्रह्म' इति ब्रह्माकारात्मज्ञानोदये तु तादृशज्ञानविषयीभूतस्यात्मन आवरणभङ्गमात्रं ज्ञानेन जन्यते। आत्मरूपो विषयस्तु स्वयमेव प्रकाशते। तस्मादात्मज्ञानेन विषयो न प्रकाशते।

एवमीश्वरस्य 'अहं ब्रह्मास्मि' इति मायावृत्तिरूपज्ञानस्य विषयभूतः ईश्वरस्यात्मा आवरणरहितस्वयंप्रकाशस्वरूपोऽस्ति। तस्मादावरणभङ्गो वा विषयप्रकाशो वा नेश्वरज्ञानस्य प्रयोजनम्। यथा जीवन्मुक्तस्य विदुषः आवरणरहितमात्मानं विषयीकुर्वन्ती 'अहं ब्रह्मास्मि' इत्यन्तःकरणवृत्तिरावरणभङ्गादिप्रयोजनशून्या भवति; तथैवेश्वरस्यापि आवरणभङ्गादिप्रयोजनशून्यं मायावृत्तिरूपं 'अहं ब्रह्मास्मि' इति ज्ञानं विनैवोपदेशादिसाधनमुत्पद्यते।

इत्थं रामकृष्णादीनां जीवाद्वैशिष्ट्यसत्वेनेश्वरत्वं सिद्ध्यति। तथापि तेषां शरीरं मायाकार्यम्। अत एव न तत् ब्रह्मरूपं, किन्तु मिथ्या। मायाकार्यभूतमवतारपुरुषाणां शरीरं करचरणाद्यवयवोपेतं रूपसहितं चोत्पादितम्। तस्मात्तेषां शरीरं नेत्रेन्द्रियविषयतामापद्यते। तथापि नेत्रेन्द्रियं न ब्रह्म विषयीकरोति।

(२२१) **ब्रह्म त्वगिन्द्रियस्य न विषयः**—त्वगिन्द्रियं तु स्पर्शं तदाश्रयद्रव्यं च विषयीकरोति। ब्रह्म तु न स्पर्शरूपं नापि स्पर्शस्याश्रयः। अतो न ब्रह्मणस्त्वगिन्द्रियविषयत्वम्।